# Dharadharakritam Shiva Stotram

# ધરાધરકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Dharadharakritam Shiva Stotram

File name : dharAdharakRRitaMshivastotram.itx

Category : shiva, tAmraparNImAhAtmya, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 52/68-80||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# ધરાધરકૃતં શિવસ્તોત્રમ્

અસ્તૌષીદગ્રતો દેવં સામ્બમભ્યુદયાત્મકમ્ ।
નમશ્શિવાય દેવાય સર્વાતીતાય વેધસે ॥ ૬૮॥

ગુણત્વાકૃતિમાનાય ગુણાકારાય હેતવે ।
મન્ત્રતન્ત્રસ્વરૂપાય પઞ્ચતન્માત્રસાક્ષિણે ॥ ૬૯॥

અપઞ્ચીકૃતભૂતાય પઞ્ચભૂતાત્મને નમઃ ।
તીર્થમૂર્ત્યા જગત્સર્વં પાપાત્ત્રાતાઽઽત્મસેવિનામ્ ॥ ૭૦॥

યોઽસૌ સીદન્તમશુચૌ માં પાલયતુ ભૂતભૃત્ ।
ગઙ્ગાધરઃ શશિધરો ભવો ભીમો ભવાન્તકઃ ॥ ૭૧॥

અન્તકસ્યાન્તકસ્સોઽયમવતાદંહસો વિભુઃ ।
યમેનમકૃતાકારમેકદ્વિત્રિભેદતઃ ॥ ૭૨॥

એકમેવ પરં પ્રાહુસ્તસ્મૈ સોમાય તે નમઃ ।
સર્વેષામેવ જન્તૂનામન્તર્જીવકલાત્મકમ્ ॥ ૭૩॥

પ્રવૃત્તિશ્ચોપલબ્ધિશ્ચ કથિતઃ તમુપાસ્મહે ।
નાદબિન્દુકલાભેદૈઃ ક્ષરાક્ષરવિકલ્પનૈઃ ॥ ૭૪॥

સ્તૂયતે નિગમૈર્યોઽસૌ સદા ભવતુ મે ગતિઃ ।
યદેકદેશાદર્કાદ્યાઃ દ્યોતન્તે હિ નભસ્થલે ॥ ૭૫॥

યદાજ્ઞયા બ્રહ્મમુખાઃ તસ્મૈ બ્રહ્માત્મને નમઃ ।
કેચિત્તરન્તિ વૈ મૃત્યું કેચિદંહો દુરત્યયમ્ ॥ ૭૬॥

કેચિત્તરન્તિ દારિદ્ર્યં નમસ્તસ્મૈ દયાત્મને ।
અષ્ટમૂર્તિરનેકાત્મા નિગમાન્તઃ પ્રદર્શિતઃ ॥ ૭૭॥

સર્વાત્મા શઙ્કરઃ સાક્ષી ક્ષેમાય પુરતોઽસ્તુ મે ।
ત્વાં દેવદેવં પુરુષં સદ્યોજાતમનામયમ્ ॥ ૭૮॥

ક્ષેમઙ્કરં વામદેવમઘોરં પ્રણતોઽસ્મ્યહમ્ ।
ઈશાનઃ શાશ્વતઃ સાક્ષી સોઽયં તત્પુરુષો વિભુઃ ॥ ૭૯॥

નમો નમશ્શાશ્વતશાન્તિકરિન્ શમાંવતાં ભૂરિકરપ્રિયાકરઃ ॥ ૮૦॥

સ નઃ સમસ્તાભ્યુદયૈકહેતુકો ભવેદ્ભયાનામુપશાન્તિકૃદ્વિભુઃ ।

ઇતિ તામ્રપર્ણીમાહાત્મ્યે ૫૨-અધ્યાયાન્તર્ગતં
ધરાધરકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૫૨/૬૮-૮૦॥

tAmraparNImAhAtmya . adhyAya 52/68-80..

Proofread by PSA Easwaran

*Dharadharakritam Shiva Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*